**राध** सिद्धौ अक० निष्पादने पाके च सक० स्वादि० दिवा० च पर० अनिट् । राध्नोति राध्यति अरात्सीत् अराद्ध रेधतुः रराधतुः । शुभाशुभालोचने च । तद्योगे शुभाशुभस्वामिनः सम्प्रदानता । "गर्गो राध्यति रामाय" वोपदेवः । अप+दोषकरणे "यन्मह्यमपराध्यति" म० घः ।

**राध** पु० राधा विशाखा तत्समीपस्था अनुराधा च तद्युक्ता पौर्णमासी अण् ङीप् राधी सा यत्र मासे पुनरण् । १चान्द्रे वैशाखे मासि । स्वार्थे २पक्षे ३गुरुवर्षे च कार्त्तिकशब्दे दृश्यम् । ४तत्पूर्णिमायां स्त्री ङीप् ।

**राधन** न० राध—ल्युट् । १साधने २प्राप्तौ मेदि० । ३तोषे च हेम० । राध-णिच्-युच् । पूजने स्त्री टाप् ।

**राधस्** न० राध—असुन् । अन्ने निघण्टुः ।

**राधा** स्त्री राध—अच् । १विशाखानक्षत्रे रिरंसया रमणीदेहत्वेनाविर्भूते गोलोकस्थे परमेश्वरार्द्धाङ्गस्वरूपे २शक्तिभेदे तत्रैव श्रीदामशापात् वृन्दावने जातायां वृषभानुसुतायां ३प्रधानगोपिकायाम् ४कर्णस्य पालयित्र्यां मातरि च । ५वैशाखपौर्णमास्यां स्त्री ङीप् । [द्योऽप्यत्र

**राधाकान्त** पु० राधायाः कान्तः । श्रीकृष्णे राधावल्लभा-

**राधातनय** पु० राधायास्तनयः । कर्णे स हि कन्यावस्थायां सूर्यात् कुन्तीगर्भजातस्तया च त्यक्तः राधया सूतपत्न्या पालित इति भारतप्रसिद्धम् । [पालितत्वात् ढक् । कर्णे

**राधेय** पु० राधाया अपत्यम् पुत्रत्वेन परिग्रहणेन तत्-

**राम** पु० रम—कर्त्तरि घञ् ण वा । १परशुरामे २दशरथज्येष्ठपुत्रे श्रीरामे ३बलरामे च "भार्गवो राघवो गोपस्त्रयो रामाः प्रकीर्त्तिताः" वह्निपु० । रामशब्दनिरुक्तिः "राशब्दो विश्ववचनो मश्चापीश्वरवाचकः । "विश्वानाधीश्वरो यो हि तेन रामः प्रकीर्त्तितः" ब्रह्मवै० ज०ख० ११०अ० । ४मनोहरे ५सिते ६असिते च त्रि० मेदि० । ७वास्तूकशाके ८कुष्ठे (कुड़) न० मेदि० ९तमालपत्रे न० राजनि० ।

**रामकर्पूरक** पु० रामं मनोहरं कर्पूरमिव कन् । सौगन्धिके स्वनामख्याते तृणभेदे शब्दर० ।

**रामगिरि** पु० रामाश्रितः गिरिः । चित्रकूटपर्वते स हि रामेण वनवासगमनकाले प्रथममाश्रितः ।

**रामचन्द्र** पु० रामश्चन्द्र इवाह्लादकत्वात् । दशरथज्येष्ठपुत्रे श्रीरामे शब्दर० । [मदनवृक्षे (मयनागाछ) भावप्र० ।

**रामच्छर्दनक** पु० राममभिरामं छर्दयति छृद—णिच्—ण्वुल् ।

**रामजननी** स्त्री ६त० । १वसुदेवपत्न्यां रोहिण्यां २जमदग्निपत्न्यां रेणुकायां ३दशरथपत्न्यां कौशल्यायाञ्च ।

**रामठ** न० रमठ+स्वार्थे अण् । १हिङ्गुनि अमरः । तत्तुल्यगन्धके २अङ्कोठकवृक्षे रत्नमा० । नाडीहिङ्गुनि स्त्री राजनि० ङीष् ।

**रामण** न० रमयति रम-णिच् ल्यु पृषो० वृद्धिः । १गिरिनिम्बे २तिन्दुके च (तँद) राजनि० ।

**रामणीयक** न० रमणीयस्य भावः रमणीयमेव वा योपधत्वात् वुञ् । १रमणीयत्वे "मणिहारावलिरामणीयकम्" नैष० २रमणीये च ।

**रामतरुणी** स्त्री रामा अभिरामा तरुणीव । (सेओती) १पुष्पवृक्षे राजनि० ६त० । २सीतायां ३रेवत्याञ्च ।

**रामदूत** पु० रामस्य दूतः वार्त्ताहरः । हनूमति स हि रामवार्त्तां लङ्कातः सीताया आजहार ।

**रामदूती** स्त्री रामा अभिरामा दूतीव गन्धद्वारा प्रचारात् । तुलसीभेदे (रामतुलसी) शब्दच० ।

**रामनवमी** स्त्री रामस्य जन्माधारो नवमी । चैत्रशुक्लनवम्याम् । "चैत्रे मासि नवम्यान्तु जातो रामः स्वयं हरिः" अगस्त्यसंहिता । "प्राप्ते श्रीरामनवमीदिने मर्त्त्यो विमूढधीः । उपोषणं न कुरुते कुम्भीपाकेषु पच्यते" ति० त० ।

**रामपूग** पु० रामः अभिरामः पूगः । गुवाकभेदे त्रिका० ।

**रामबाण** पु० रसभेदे भावप्र० ।

"पारदामृतलवङ्गगन्धकं भागयुग्मसरिचेन मिश्रितम् । तत्र जातिफलमर्द्धभागिकं तिन्तिडीफलरसेन मर्द्दितम् । वह्निमान्द्यदशवक्त्रनाशनो रामबाण इति विश्रुतो रसः । संग्रहग्रहणिकुम्भकर्णकमामवातखरदूषणं जयेत् । दीयते तु स्वबलानुमानतः सद्य एव जठराग्निदीपनः । रोचकः कफकुलान्तकारकः श्वासकासवमिजन्तुनाशनः" भावप्र० ।

**रामभद्र** पु० राम एव भद्रः मङ्गलदायकत्वात् । श्रीरामे "रामेति रामचन्द्रेति रामभद्रेति वा स्मरन्निति" पद्मपु० ।

**रामलवण** न० कर्म० । शाम्भरिलवणे रत्नमा० ।

**रामवल्लभ** न० रामस्य वल्लभं प्रियम् । १भूर्जपत्रे राजनि० तद्धि रामेण वनवासाश्रमे प्रियतया धृतम् । २तत्प्रिये त्रि० । [बाणहेतुत्वात् मनोहरः ।

**रामशर** पु० कर्म० । शरवृक्षभेदे राजनि० स हि काण्डद्वारा

**रामसख** पु० ६त० टच् । सुग्रीवे वानरराजे शब्दच० ।

**रामा** स्त्री रमतेऽनया रम-करणे घञ् । १गीतादिकलाभिज्ञायां नार्य्यां २नारीमात्रे भावप्र० ३नद्याम् ४हिङ्गुनि मेदि० ५हिङ्गुले पु० ६श्वेतकण्टकार्य्यां ७म्लेच्छकन्यायां ८अशोके